# TET-MAY 2012
## PART-II
## LANGUAGE I-SANSKRIT

**(1-5) अधोदत्तं गद्यांशं पठित्वा 1 तः 5 प्रशनान् उत्तरत।**

पाणिनिः न केवलं महान् वैयाकरणः प्रत्युत कविः अपि आसीत्। 'पातालविजयम्' इति तस्य पद्यमयी काव्यकृतिः वर्तते। पातालविजयस्य 'जाम्बवतीविजयम्' इति अपरमपि नाम अस्ति।यद्यपि अद्य इदं काव्यं न उपलभ्यते तथापि तस्मात् केचन श्लोकाः इतस्ततः उध्दृताः दृश्यन्ते। पञ्चतन्त्रस्य श्लोकः अस्मान् सूचयति यत् कश्चनसिंहः पाणिनिं व्यापादितवान्। तत्र उच्यते 'सिंहोव्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः।' यस्मिन् दिने सिंहः पाणिनिं व्यापादितवान् तदा त्योदशी तिथिः आसीत्। अत एव अद्यापि पारम्परिक-शिक्षानुष्ठानेषु त्रयोदश्यां तिथौ व्याकरणस्य पठन-पाठने न भवतः।

1) वैयाकरणः इत्यस्य शब्दस्य अर्थः
   a) व्याकरणस्य आकलनं न करोति।
   b) व्याकरणं वेत्ति अधीते वा।
   c) व्याकरणं पठितुं न शक्नोति।
   d) यः व्याकरणं न अधीते।

2) जाम्बवतीविजयम् - इति एतस्य अपरं नाम
   a) पाणिनेः व्याकरणस्य
   b) पाणिनेः खण्जकाव्यस्य
   c) पाणिनेः पातालविजयस्य
   d) पाणिनेः गद्यकाव्यस्य

3) सिंहः पाणिनिं <u>व्यापादितवान्</u>। रेखाङ्कितस्य पदस्य अर्थः
   a) आकेरमणं कृतवान्
   b) पातितवान्
   c) मारितवान्
   d) जग्धवान्

4) त्रयोदश्यां व्याकरण पठन पाठने न भवतीत्यत्र कारणम्
   a) परम्परानुगतम्
   b) अस्यां तिथौ पाणिनिः मृतः
   c) पञ्चतन्त्रे नीतिश्लोकः एवं सूचयति
   d) व्याकरणशास्त्रकारस्य शापः

5) पाणिनिना विरचितं ग्रन्थद्वयम्
   a) अष्ठाध्यायी-महाभाष्यम्
   b) अष्ठाध्यायी-जम्बवतीविजयम्
   c) अष्ठाध्यायी-वार्तिकम्
   d) अष्ठाध्यायी-पातालजयम्

(6-10) अधोदत्तं पद्यं पठित्वा 6 तः 10 प्रशनान् उत्तरत।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषाः वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।

6) अयं श्लोकः इतः स्वीकृतः
- a) चम्पू काव्यतः
- b) नाटकतः
- c) शतक काव्यतः
- d) अलङ्कार शास्त्रतः

7) श्लोकानुसारं प्रयत्नकरणेनापि फलं न सिध्यति- इत्यत्र
- a) दैवेन न दत्तम्
- b) एकैव प्रयत्नः कृतः
- c) दैवेन प्रतिघटितम्
- d) आत्मशक्त्या प्रयत्नो न विहितः

8) श्लोकानुसारेण पुरुषः इत्थं भवेत्।
- a) सर्वकारसेवको भवेत्।
- b) सज्जनः भवेत्।
- c) दैवभक्तो भवेत्।
- d) यत्नशीलः भवेत्।

9) कापुरुषः इत्यस्य पदस्य भावः
- a) दुर्जनः
- b) अल्पज्ञानी
- c) पण्डितः
- d) अल्पसन्तुष्टः

10) निहत्य- इत्यस्य पदस्य पदनिरमाणम् एवं भवति।
- a) नि-हन्-ल्यप्
- b) नि-हन्-अनीयर्
- c) नि-हा-ल्यप्
- d) नि-हृ-ल्यप्

11) 'अहं मातरं वन्दे' - अस्य वाक्यस्य कर्मणि प्रयोगे रूपं एवं भवति।

a) मया मातरं वन्द्यते।

b) मया माता वन्दामि।

c) मया माता वन्द्यते।

d) माता मां वन्द्यते।

12) 'यदा प्रातः भवति..........पक्षिणः कूजन्ति।' उचितं पदं चित्वा रिक्तस्थानं पूरयत।

a) तथा

b) तावत्

c) तदा

d) तस्मिन्

13) 'दुष्यन्तः शकुन्तलां व्यस्मरत्' ।अस्मिन् वाक्ये क्रियायाः क्तवतु प्रत्ययान्तरूपम् एवं भवति।

a) विस्मृतवती

b) विस्मारितवान्

c) विस्मयितवान्

d) विस्मृतवान्

14) प्रसङ्गरीत्या वाक्यानां योजना कार्या।

1) सर्वे स्यामं नेतारं स्वीकुर्वन्ति।

2) देशे दुर्नीति निवारणाय उपवासं कर्तुं स्यामः उद्युक्तः।

3) स्यामः ग्रामस्य उन्नतिमिच्छन् कार्यं करोति।

4) अनुचराः सर्वविधं साहाय्यं कुर्वन्ति।

5) आरक्षकाः तं नीत्वा कारागारे प्रक्षिपन्ति।

a) 1,2,5,4,3

b) 1,3,2,4,5

c) 3,4,1,2,5

d) 1,5,3,2,4

15) 'सट्टकम्' - नाम रूपक प्रभेदस्य उदाहरणम्

a) अविमारकम्

b) पञ्चरात्रम्

c) कर्पूरमञ्जरी

d) कुन्दमाला

16) हर्षदेवस्य रचने

a) अनर्घराघवम् - प्रसन्नराघवम्

b) प्रियदर्शिका - नागावलिः

c) ऊरूभङ्गम् - दूतखटोत्कचम्

d) आश्चर्य चूडमणिः - स्वप्नवासवदत्ता

17) 'तत्र त्वम् असि।' एतद्वाक्यं उत्तमपुरुषे एवं भवति।

a) तत्र त्वम् अस्मि।

b) तत्र अहम् अस्मि।

c) तत्र अहम् अस्ति।

d) तत्र त्वम् स्वः।

18) एतेषु विसर्गसन्धेः साक्षात् उदाहरणम्

a) सर्वकाराच्च

b) सर्वकारश्च

c) सर्वकार एव

d) सर्वकारैव

19) 'आतपशुष्कः' - इत्यस्य पदस्य विवरणम्

a) आतपे शुष्कः

b) आतपात् शुष्कः

c) आतपेन शुष्कः

d) आतपाय शुषकः

20) एतेषु क्रियापदेषु सकर्मक क्रियापदम्-

a) पठति

b) हसति

c) धावति

d) डयते

21) पाणिनि मुनेः माहेश्वरसूत्रप्रयोगेण 'हल्' इति प्रत्याहारःसूजयति।

a) स्वरवर्णान्
b) सर्वाणि अक्षराणि
c) व्यञ्जनवर्णान्
d) संयुक्ताक्षराणि

22) उचितपदं चित्वा रिक्तस्थानं पूरयत।

........बालिकाःपुष्पाणि लुनन्ति।

a) केचन
b) कश्चन
c) कांश्चन
d) काश्चन

23) 'अहो खलु भुजङ्गस्य विचित्रोयं वधक्रमः' - इत्यस्मिन् श्लोकपादे प्रयुक्तः अलङ्कारः

a) उत्प्रेक्षा
b) अनन्वयः
c) रूपकम्
d) दीपकम्

24) 'न श्रूयते हेममयः कुरङ्गः' इत्यस्मिन् पादे प्रयुक्तं वृत्तम्

a) दोधकम्
b) उपेन्द्रवज्रा
c) इन्द्रवज्रा
d) भद्रिका

25) संस्कृतभाषाशिक्षणम् एतदर्थम् इदानीमपि परासङ्गिकम्

a)विद्यार्थीनां ज्ञानविकासनार्थम्
b) भारतीय भाषाणाम् अवगमनार्थम्
c)प्राचीन भारतीय विज्ञानस्य सम्पादनर्थम्
d) भारतीय संस्कृतेः ज्ञानार्थम्

26) संस्कृतशिक्षणावसरे एषः अत्युत्तमः विधिः

a) परियोजनाविधिः
b) समन्वयविधिः
c) दण्डान्वयविधिः
d) आगमनविधिः

27) सूक्षमशिक्षणम्

a) कक्ष्या प्रविधिः
b) प्रशासन प्रविधिः
c) अध्यापन प्रविधिः
d) प्रशिक्षण प्रविधिः

28) भाषाप्रयोगशालायां सङ्गणकम् एतदर्थम् उपयुञ्जमहे

a) श्रवणकौशल विकासाय
b) भाषणकौशल विकासाय
c) श्रवणभाषणकौशल विकासाय
d) मनोरञ्जनाय

29) भाषाज्ञान णूल्याङ्कने अयम् अत्यन्तं प्रधानांशः

a) उद्देश्यानि
b) पाठ्यविषयः
c) भाषा
d) व्यवहारः

30) संस्कृतभाषा शिक्षणस्य लक्ष्यम् इदं भवितुमर्हति

a) भाषान्तरज्ञानसम्पादनम्
b) चतुर्विधशिक्षणकौशलानां विकसनम्
c) संस्कृतसाहित्ययोः परिरक्षणम्
d) सनातनधर्म परिरक्षणम्